सा० द० "विकृताकारवाग्वेशचेष्टादेः कुहकाद्भवेत्। हासो हास्यस्थायिभावः श्वेतः प्रमथदैवतः। विकृताकारवाक्चेष्टं यदालोक्य हसेज्जनः। तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्। अनुभावोऽक्षिसङ्कोचवदनस्मेरतादिकः। निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः"।

**हासस्** पु० हस-णिच् असुन्। चन्द्रे वेदनि०।

**हासिका** स्त्री हस-भावे ण्वुल्। हास्ये हेमच०।

**हास्तिक** न० हस्तिनां समूहः ठञ्। १हस्तिसमूहे अमरः। हस्तिनमारोहति ठक्। २हस्त्यारोहे।

**हास्तिन** न० हस्तिना नृपेण निर्वृत्तम् नगरम् अण् संयोगपरत्वादिनो नटिलोपः। हस्तिनापुरे त्रिका०। हास्तिना इदं हस्तिनः परिमाणं वा अण्। २हस्तिसम्बन्धिनि ३हस्तिपरिमाणे च त्रि०।

**हास्य** न० हस-ण्यत्। १हासे हसने अमरः २अलङ्कारोक्ते रसभेदे च। "अकम्पं हसितं श्रेष्ठं मौलिताक्षमपापहम्। असकृद्धसितं दुष्येत् तत् सोन्मादस्य कैकधा" गारुडे ६६ अ०।

"ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च नीचानामपहसितं तथाऽतिहसितञ्च षड्भेदाः"। "ईषद्विकासि नयनं स्मितं स्यात् स्पन्दिताधरम्। किञ्चिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः। मधुरस्वरं विहसितमांसशिरःकम्पमवहसितम्। अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम्" सा० द०।

**हाहा** पु० हेति शब्दं जहाति क्विप्। १देवगन्धर्वभेदे अमरः। असुन् हाहस् शब्दोऽपि तत्रार्थे भरतः। हा-द्वित्वम् २विस्मयशब्दे ३शोकशब्दे च अव्य० मेदि०।

**हाहाकार** पु० हाहा इत्यस्य कारः कृ-भावे घञ्। १युद्धशब्दे २शोकध्वनौ च। [जिघाय।

**हि** वर्द्धने गतौ च स्वा० पर० सक० अनिट्। हिनोति अहैषीत्

**हि** अव्य० हा-हि-वा डि। १हेतौ २अवधारणे अमरः। ३विशेषे ४प्रश्ने ५सम्भ्रमे ६हेतूपदेशे ७असूयायां च मेदि० ८पादपूरणे ९शोके च शब्दर०।

**हिंसक** पु० हिन्स-ण्वुल्। १व्याघ्रादौ हिंस्रे पशौ २शत्रौ च ३आथर्वणे विप्रे ४हिंसाकारके त्रि० शब्दर०। "भोक्तानुमन्ता संस्कर्त्ता क्रयिविक्रयिहिंसकाः। उपहर्त्ता घातयिता हिंसकाश्चाष्टधा मताः" काशीख०।

**हिंसा** स्त्री हिन्स-अ। १वधे मेदि०। २चौर्य्यादिकर्मणि च अमरः। "हिंसा चैव न कर्त्तव्या वैधहिंसा तु राजसी। ब्राह्मणैः सा न कर्त्तव्या यतस्ते सात्त्विका मताः" बृहन्मनुः। वैधहिंसाशब्दे ४९७५ पृ० दृश्यम्।

**हिंसारु** पु० हिन्स-आरु। व्याघ्रे त्रिका०।

**हिंसालु** पु० हिंसा+अस्त्यर्थे आलु। १हिंसाशीले उणा०। २कुक्कुरे पु० हारा०।

**हिंसीर** पु० हिंसा-ईरन्। १व्याघ्रे २खगे च उणा०।

**हिंस्र** त्रि० हिन्स-र। १हिंसाशीले अमरः। २घोरे ३भये ४भीमसेने ५हरे पु० उणा०। ६मांस्यां ७काकादन्यां ८जटामांस्याम् ९एलवालुकायां १०गवेधुकायां ११सिरायाम् १२नाड्यां च स्त्री शब्दच०। [अहिक्किष्ट।

**हिक्क** कूजने भ्वा० उ० अ० सेट्। हिक्कति ते अहिक्कीत्

**हिक्क** हिंसायां चु० आ० सक० सेट्। हिक्कयते अजिहिक्कत।

**हिक्का** स्त्री हिगिति शब्दं करोतीति पृषो०। रोगभेदे (हेचकी) अमरः।

तन्निदानादिकं भावप्र० उक्तं यथा

"अथ हिक्काधिकारः। तत्र हिक्कायाः विप्रकृष्टं निदानमाह "विदाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः। शीतपानाशनस्नानरजोधूमातपाऽनिलैः। व्यायामकर्मभाराध्ववेगाघातापतर्पणैः। हिक्का श्वासश्च कासश्च नृणां समुपजायते"। अपतर्पणमनशनादि। संप्राप्तिमाह "वायुः कफेनानुगतः पञ्च हिक्काः करोति हि। अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा"। सामान्यलक्षणमाह "मुहुर्मुहुर्वायुरुदेति सस्वनः यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन्। सघोषवानाशु हिनस्त्यसून्यतस्ततस्तु हिक्केत्यभिधीयते बुधैः"। वायुरत्र सोदानः प्राणो बोद्धव्यः। उदेति ऊर्द्ध्वं याति। सस्वनः शब्दवान्। ऊर्द्ध्वगमनं विशिनष्टि यकृदित्यादि प्लिह इति शब्दोऽप्यस्ति दीर्घत्वविकल्पात्। मुखादिति ल्यब्लोपे पञ्चमी तेन यकृत्प्लीहान्त्राणि मुखमानीय आक्षिपन् निःसारयन् इवेत्यर्थः। वायुः दोषवान् दोषोऽत्र कफः तद्वान् वायुः कफेनानुगत इति सम्प्राप्तिः। हिनस्तीति हिक्का पृषोदरादित्वाद्रूपसिद्धिः हिगिति शब्दं करोतीति वा। पूर्वरूपमाह "कण्ठोरसोर्गुरुत्वञ्च वदनस्य कषायता। हिक्कानां पूर्वरूपाणि कुक्षेराटोप एव च"। वदनस्य कषायता वातात्। अन्नजालक्षणमाह "पानान्नैरतिसंयुक्तैः सहसा पीडितोऽनिलः। हिक्कयत्यूर्द्ध्वगो भूत्वा तां विद्यादन्नजां भिषक्" अनिलः प्राणो वायुः। यमलालिङ्गमाह "चिरेण यम-